International Journal of Sanskrit Research 2020; 6(5): 333-336

International Journal of Sanskrit Research

अनन्ता

**ISSN: 2394-7519**
IJSR 2020; 6(5): 333-336
© 2020 IJSR
www.anantaajournal.com
Received: 12-06-2020
Accepted: 26-07-2020

**अम्बटि. विद्यासागरः**
शोधछात्रः, आ. नागार्जुन विश्वविद्यालयः, नागार्जुन नगर, गुंटूर, आंध्र प्रदेश, भारत

**डा. डि. यन्. दीक्षितः**
मार्गदर्शकः, आ. नागार्जुन विश्वविद्यालयः, नागार्जुन नगर, गुंटूर, आंध्र प्रदेश, भारत

**Corresponding Author:**
**अम्बटि. विद्यासागरः**
शोधछात्रः, आ. नागार्जुन विश्वविद्यालयः, नागार्जुन नगर, गुंटूर, आंध्र प्रदेश, भारत

# श्रीभाष्यं विजयसारथेः मन्दाकिनी काव्यस्य महौत्कृष्टत्वम्

**अम्बटि. विद्यासागरः और डा. डि. यन्. दीक्षितः**

**प्रस्तावना**

मन्दाकिनी विजयसारथेः कृतिषु प्रौढतरं काव्यम्। मन्दं अकति इति जिच्छति इति। मन्दाकिनी शब्दस्य यौगिकाऽर्थे सत्यपि गङ्गायाः नामसु मन्दाकिनी शब्दः रूढः। गङ्गायाः उपनदीषु भागीरथी, मन्दाकिनी इत्यादि नामाभिः शाखा नदीनां प्रसिद्धिः तासां हिमालयेषु तत्र तत्र संगमः सङ्गमस्थलानां प्रयागशब्देन व्यवहारः अद्यापि प्रसिद्धः एव देवप्रयागः , रुद्रप्रयागः, कर्णप्रयागः इत्यत्र यथा -- यावत् अलहाबाद् नगरे यमुनायाः सङ्गमः तावत्पर्यन्तं बहवः प्रयागाः वर्तन्ते। बदरिका क्षेत्रे गङ्गायाः नाम मन्दाकिनी प्रसिद्धा। तथापि मन्दाकिनी शब्दः समग्रायाः गङ्गायाः पर्यायतया रूढः।

**मन्दाकिनी शब्दोत्पत्तिः महौत्कृष्टत्वम् ----**

संस्कृतवाङ्मये समग्र गङ्गापर्यंयतया मन्दाकिनी शब्दः बहुषु काव्येषु प्रयुक्तः दृश्यते। यथा नैषधीयचरिते ---

**अश्रान्त श्रुतिपाठपूतरसनाविर्भूतभूरिस्तवा**
**जिह्वाब्रह्ममुर्खौघविघ्नितनस्वर्ग क्रिया र्कलिना।**
**पूर्वं गाधिसुतेन सामिघटिता मुक्ता नु मन्दाकिनी**
**यत्प्रासादद्दुकूलवल्लिरनिलादोलैरखेलद्दिति।।** [1]

रामायणेपि मन्दाकिनी शब्दः गङ्गा पर्यायतया प्रसिद्धः विशेषतया आकाशात् हरशिरसि अवतरन्ती गङ्गा मन्दाकिनी नाम्ना काव्येषु व्यवहृता। गङ्गायाः अवतरण कथा संस्कृतवाङ्मये प्रथमतया बालकाण्डे श्रीमद्रामायणे पञ्चसु सर्गेषु वर्णिता।
सूर्य वंशजः सगरः अश्वमेधेन इष्टवान् तस्य एकस्यां भार्यायां षष्ठिसहस्र पुत्राः द्वितीयस्यां एकः पुत्रश्च बभूवुः।
तेषु द्वितीयस्याः पुत्रः नाम्ना कर्मणापि असमुञ्जसः पित्र सज्यात् बहिष्कृतः। तदानीं तस्य पत्नी अन्तर्वन्ती आसीत्। तस्याः अंशुमाक्षः नामकः। सगरस्य षष्ठिः पुत्र सहस्राणि यागाश्वरक्षकाः यागाश्वमन्वयुः। इन्द्रोऽपि सगरस्य शततमं अश्वमेथं सान्तरायं कर्तुं यज्ञाश्वं जहार पाताले नारायणावतारस्य कपिलस्याश्रमे गोपायितवान् च। सगरकुमाराः अश्वं अदृष्टवा भूमिं खनित्वा पातालं ययुः कपिलाश्रमे अश्वं दद्रष्टुः कपिलमेव अश्वस्य हर्तरं मत्वा तर्ज्जयामास। ततः कुपितेन कपिलेन ते भस्मसात्कृतः।

**अभ्यथावन्त संक्रुद्धास्तिष्ठ तिष्ठेति चाब्रुवन्।**

**अस्माकं त्वं हि तुरगं यज्ञियं हृतवानसि।।** [1]

**दुर्मेधस्त्वं हि संप्राप्तान्विद्धि नः सगरात्मजान्।**

तेषां पारलौकिकाः क्रियाः कर्तुं कस्यापि अवकाशः नासीत् अनन्तरं सगरस्य पौत्रः अंशुमान् कपिलाश्रं गत्वा कपिलं प्रसाद्य अश्वमनीय यज्ञसमाप्तिं कृतवान्। तत्र सलिलस्य अलभ्यत्वात् सलिलक्रियाः कर्तुमपि अशुंमान् न पारितवान्। अशुंमान् दिलीपः भगीरथः इति क्रमेण सर्वे सगरवंशजाः गङ्गां पालमानेतुं तपस्यां चक्रुः। तेषु अंशुमतः पौत्रः भगीरथः एव सफलो बभूव। वतरिष्यमाणां गङ्गां धर्तुं शिव एव समर्थः इति ज्ञात्वा भगीरथः शिवं प्रसाद्य गङ्गां धारयितुं प्रार्थितवान्। प्रथमं शिवजटाजूटे अवतीर्णे गङ्गा शिवशिरसि गर्वेण विहरणं कृतवती शिवेन सा जटाजूटे बद्धा शिवोपि भगीरथ मनुसृत्य सप्तधा गङ्गां बिन्दुसरसि पातयामास। भागीरथ मनुसरन्ती गङ्गा क्रमेण पातालं प्रविश्य त्रिपथगा बभूव। इमां कथां आधारीकृत्य केवल गङ्गावतरण वर्णनात्मकं वर्णनमेव आदाय विजयसारथिः मन्दाकिनी काव्यं रचितवान्। कविना ईषत् परिवर्तिता श्रीमद्रामायण शता मूलकथा स्वकाव्ये अभिवर्णिता। मन्दाकिन्याः रचनोद्देशः कविना स्वयं एवमाविष्कृतः।

[1]अभिजानन्त्येव समेऽपि सुमनसो विद्वांसः शङ्करजगन्नाथनीलकण्ठ प्रमुखा महापुरुषाः भगवतीं भागीरथीं स्तुत्वा तस्या अनुग्रहविशेषेण परमांप्रतिष्ठाम् अवापुरिति। तेषाम् अनुकरणेन अनुसरणेन च वयं आत्मनः कृतार्थतां मन्यामहे। ऐहिकामुष्मिकफल- धात्रीति गङ्गेयं बहुपुराणेषु बहुधाऽजेगीयत। भगवत्या स्सुरसरितः पममावतरणकथा गीतेषु ग्रथिता मया। औचित्यदृशा किञ्चिदिव परिवर्तितापि कथा। काव्येऽस्मिन् विषयेयं एव सन्दब्धोस्ति प्रादान् मन्दाकिनी मात्मसुतां परिवहराजः सागराय। सङ्गस्तु मुत्कण्ठ तेसागरोऽपितया। कल्लोलैरभ्रङ्कषैः तां बलात् ग्रहीतुं काऽमोपि शासनात् भगवतो विभाय। वेलेयं न कदाऽपि भवतातिं- क्रम्यतामिति तं भगवानपि बलवद् आदिदेश। गङ्गाया बलवद्- वतारणेन लोकस्यापकृतिर्भूयसीभवेदित्युभयधा सन्त्रस्त इव सागरः सौवादुद्यमात् व्यरंसीत्। विरहवेदनाम सहमानोऽपि सोऽयं किं कर्तव्यताविमूढेन मनसा क्षणमिवविचिन्त्य भगीरथं स्वपरमसखं राजप्रतिनधिम् आकार्य तं प्रार्थयामा सैवम् सखे। भवता कथमपि प्रेयसी मम सेयं सुरसरित् आनीयतामिति सोऽपि भगीरथः स्वमनोरथं सफलमेवमन्वानः कपिलेन शापाग्निना भस्मसात् कृतान् स्ववंशीयान् गङ्गाजलाप्लावनेन परलोकम् अवापयितुं सागराभीष्ट- ञ्चसफलं कर्तुं तामानेतुं समुद्यतः सागरानुमत्या स्वर्लोकमयासीत्। आतिर्थयविधिना सत्कृतेन भगीरथेन प्रार्थिता कथितमात्मप्रियस्य सागरस्य सन्देशमन्यमुदन्दञ्च समाकर्ण्य गाढं निःश्वस्य च तं प्रत्येयमवोचतं सा सुरनदी --- भ्रात अहमपि सागरं प्राणेश्वरमुपगन्तुमुत्कण्ठ्या समुदीक्षे --- प्रत्युतमत्प्रवाहसंपातं भूमाता न कदाऽपिसोढु शक्नुयात्। यदि नाम भगवान् गिरिशो मां वोढुं नियतमभ्युपागमिष्यत् तदा ममावतरणं निर्बाधम् अभिविष्यत् अतः कार्यमिदं साधयितुं तमेव शिवम् अभ्यर्थयस्व। तदा भगीरथेन तेन संप्रार्थितो भगवान् सदाशिवः सुपर्वापगां दरीधर्तुमुररीचकार। सैषा परिवहमण्डलादात्ममन्दिरादवततार शिवशिरसि सङ्कोचितैनैव स्त्रोतसा। फालानलेन विपानलेन चाशीविपानलेन पोप्लुष्यमाणवपुः सोपि सुरधुनी-शिशिरवारिस्पर्शमात्रेण अननुभूतपूर्वं सुखं किमप्यवाप्नुवालः तां सर्वदा निजकपर्दे एव बन्दीकर्तुं यावदियेष तावदेवास्य भावमवगम्य वर्धित दुर्भरधाराबहुलेन स्त्रोतः स्वरूपेण विभ्रंभमाणा तस्य जटाजूटमयीं कारां निर्भिद्य बहिर्निर्गमत्। अवतीर्य च भुविसप्तधाविभक्तैः स्त्रोत्रोभिः सकलमपि भूमीतलं पुनती भगीरथ पथमनुरुन्धाना तपोवनानि सादरमभिनन्दन्ती, वनानि सिञ्चन्ती, भूधरान् भिन्दन्ती, क्षेत्राणि तर्पयन्ती, ग्रामान् पुराणि पल्लीश्च रञ्जयन्ती प्रकृतिमखिलां पुलकयन्ती, सागरद्वितीभिरापगाभिर्मलन्ती पुण्यानिकिरन्ती दुरितान्य-मनुदन्ती ऊष्मणं चूषन्ती तीर्थानि सार्थयन्ती परासून् भगीरथवंशान् लेखलोकमवापयन्ती प्रजामखिलामाबालगोपालमामोदयन्तीचान्तेसागरेण प्रियेण मिलित्वा तदन्तरङ्गे निलीना भवति। इदमप्यपरमवधेयमस्ति सादरं सुमनसाम् यत् अधुना विविधा सुभाषासु गीतस्यैव संरंभो दृश्यते। प्रतिभाषं अपि नवीना साहिती प्रक्रिया नूत्नेन पथा नरीनृत्यते। सारस्वते सर्वतः कोऽपि सरसस्समुन्नमेषो देदिवीति। लोकगीतनाम्ना प्रचलितस्य गीतमयस्यैव साहितीविशेषस्य साम्राज्यं प्रचलति। संस्कृते वचन प्रक्रियाया इव गीतप्रक्रियाया अपि वराक्येव स्थितिः वरीवर्ति। इदानीन्तनाः कवयोपि वचनदारिद्रयमिव गीतादारिद्रयं व्यपोहितं समुत्सहन्ते समुद्यतन्ते च। अमुनैवलक्ष्येण गङ्गावतरण कथा पञ्चमात्रकेषु गीतेषु निबद्धा। प्रवाहस्यगतेः ध्वनेश्च वैविध्यं वैदग्ध्यं चाभिव्यञ्जयितुं प्रायोगमनार्थका ध्वन्यर्थकाश्च धातवः प्रयुक्ताः काव्येस्मिन्। नियतं सर्वाण्यपि गीतानि रचनासौन्दर्येण जीवन्ति। तथापि यथामति काव्येस्मिन् रसस्यभावस्य रीतेः नीतेः शब्दस्यार्थस्य च प्रामुख्यं सर्वधा परिकल्पितम्। प्रवाहगताविव अत्रापि क्वचिद् विलंबः क्वचिद् ऋजुता क्वचिद् विरल्यः क्वापि लघुता क्वापि गुरुता क्वाप्योजस्विता क्वापि प्रसन्नता चेत्यादयो गुणरीतयः समुदञ्चन्ति।

महाकवेरस्य छन्दसि रचनायां सामर्थ्ये वर्तमानोपि संस्कृतभाषायां गीताप्रक्रिया न चिररूढा इति गेय काव्यरूपेण काव्यमिदं रचितमपि पाण्डित्यपूर्णं कृतम्। पाणिनीयधातुपाठे न्यूनाधिकाः द्विसहस्त्रं धातवो वर्तन्ते धातुपाठे दशविंशति धातून् गुच्छतया निबध्य सिद्धान्त कौमुद्यां गत्यर्थाः भाषार्थाः इति निरूपणं कृतम्। अपि च गेयस्य लयः जीवतुः एवं ताललयान्वय अनुकूलान् धातून् मात्रा च्छन्दसि निबद्धान् एव गृहीत्वा एकत्र ग्रथनं सामान्यस्य कवेः असाध्यम्। विद्वानपि कवितानुकूलं तान् उपकर्तुं न शक्नोति।

अतः विजयसारथिः विद्वत्कविः। आन्ध्रदेशे आधुनिक महाकविषु जलप्रवाह वर्णनात्मकं किन्नेकसानि पाटलु इति खण्डकाव्यं विश्वनाथ सत्यनारायणेन कृतम्। किन्नेरसानी अद्यतन खम्मम् मण्डले गोदावर्यां मिलन्ती काचन

गिरिनदी। कविसाम्राट् विश्वनाथसत्यन्नारयणः तस्याः स्त्रीरूपं आपाद्य गृहिण्याः अवस्थां तस्यामारोप्य वर्णितवान्। श्वशुरगृहे भर्तुः मात्र कृतां पीडां असह्यमाना किन्नेरसानी भार्यायाः व्यथां दृष्ट्वापि मातरं किमपि वक्तुम् असमर्थः पतिं परित्यज्य श्वशुरगृहं त्यक्त्वा पितुः गृहं प्रस्थितवती। तस्याः गतिमपि विश्वनाथसत्यन्नारायणः लयानुकूलेन वर्णितवान्। काशीभट्ल सत्यन्नारायण महोदयेन कवेरस्य (विजयसारथेः) स्वर्णोत्सवसञ्चिकायां किन्नेरसानी गीतानि एव मन्दाकिनीं रचयितुं कवेः प्रेरणं अनुकुर्वन्तिति अभिप्रायं प्रकटीचक्रुः। तत्साद्दश्यं द्योतयितुं काशीभट्ल महोदयः काव्यद्वयात् प्रत्येकं द्वित्राणि गीतानि उदाहृतवान्। आन्ध्रभाषा अनवगतापि तस्याः अर्थं अजानन्तोऽपि शब्दश्रवणमात्रेण काललया - नुकूलत्वे द्वयोः साद्दश्यं ज्ञातुं प्रभवन्तीति एकमुदाहरणं दीयते।

కెరటాలలో నుర్యు
తెరచాలలో నీటి
పొరజాలులో కిన్నె
రటు కదలి యిటు కదలి
చిటి తరంగాలలో -- పోటి తరంగాలలో
నటనాలు మొదలెట్టేనే -- క్రాన్నీటి [1]
తుటుములాకదలాడేనే
పువు కన్నెలా జగా
రవ నవ్వులా వేల్పు
కవ చివ్వలా కన్నె
రటులూగి ఎటులూగి
చిరుగాలిలో నూగు [1]
కొఱవంపులో నీటు
తఱి తీపులో కిన్నె
కటు  లేచి ఇటు లేచి [1]

तदनुसारी मन्दाकिनी नृत्यं यथा
अति मञ्जुला पुष्ट
वन वञ्जुला दीप्त
सुमकिञ्जुलालो
कवदूर्मि पूरेण------ कृतमङ्गला पल्ल
वित जञ्झला वीचि
मय कंगुला पास्त
गद जङ्गुल

पराशक्तिस्वरूपिणी मन्दाकिनी गूढार्थरूपेण अत्र वर्णिता इति काशीभट्लमहोदयैः एव प्रतिपादितम्। अत्र तात्विकदृष्टिः प्रवाहेन सममुपवर्णिता ।

यथा --- **ओंकार गम्भीर मञ्जुलस्तानितेन**
**विमलामृतासार पूरमा कल्पयति**
**कदम्बिनीव सा मन्दाकिनी**
**सा पराशक्तिरिवमन्दाकिनी।।** 1

कदम्बनी मेघमाला तस्याः स्तनितमिव गङ्गाप्रवाह ध्वनिरपि भवति स च ध्वनिः प्रमवात्मक एव । तया स्वरूपा सा परत्वं परमात्मत्वं च भक्तस्य कल्पयति सा च पराशक्ति- रूपा कालत्रयामात्य क्रमस्वरूपा । एवं मन्दाकिनी महाशक्त्या अभिन्नां कविः ददर्श । राधाकृष्णयोः अद्वैतत्वे राधापि मन्दाकिन्येव

यथा --- **मुग्धमूलाधारमञ्जीरथा मञ्जु**
**षड्बलादिष्ठानरशनयामणिपूर**
**वैजयन्त्याऽनहताब्ज**
**कन्धरामङ्गल सूत्रतायाज्ञ**
**फलभूषणयेन्दु मिहिरताटंकया**
**कुण्डलीन्याख्यया श्रीपरशक्त्येव**
**विरहमाणः परन्धामा शिरोधाम्नि ।**

मन्दाकिनी मूलधारं परिषिध्य पृथिवी तत्वं अमृतमयं कृत्वा अवगाढं अमृतं रकोति । एवं काशीभट्लमहोदयैः बहुधा मन्दाकिनी श्लाघिता । न. च रघुनाथाचार्यः अपि मन्दाकिनी परमात्मतत्वभूषिता इति प्रशशंसुः । कोराड सुब्रह्मण्य महोदयैः काव्यस्य अलङ्कारशैली बहुधा विवृता । अपि च पाणिनीय प्रयोगविशेषाः अपि बहवः अत्र दृश्यन्ते । यङ्न्ताः यङलुगन्ता क्यजन्ता क्यङ्न्ताः कृदन्ताश्च प्रयोगविशेषाः बहवः अस्मिन् काव्ये दृष्टाः । एतान् प्रयेगन् अर्थतः शब्दाश्च ज्ञातुं पाणिनीय प्रवीणाः नैरुक्ताः एव समर्थाः इति सुब्रह्मण्येन यदुदाहृतं तदक्षरशः सत्यम् ।

यथा ---- 1. विजहरीति ---- यङ्लुगन्तः
2. दंद्रम्ते , जंहम्यते ----- इति यङ्गन्तौ
3. शब्दायते , वैरायते --- शब्दवैरकलहाभ्र कण्वर्मेहेभ्यः करणे ( 3-1-17 ) इति सूत्रे समर्थौ प्रयोगौ । [1]
4. परिचाय्य - अग्नौ परिचाय्योपचाय्य समूह्याः ( 3-1-131) इति सूत्रम् । अनिविशेषे प्रयोगे निपातितः ।
5. सान्ताय्य - सान्नाय्यं हविर्विशेषः पाय्य सान्नाय्य निकाय्य

धाय्य - इति सूत्रेण (3-1-129) इत्यादयो ज्ञेयाः ।
एवं कवेः अभिनन्दनसञ्चिकायामेव काव्यमिदं
बहुभिः बहुधा प्रशस्तमिति अलं विस्तरेण ।

**उपयुक्तग्रन्थसूची**


1. बाणः, नैषधीयचरितम् , स –2, श्लो – 102
2. वाल्मीकिः, रामायणम् , बालकाण्डः, श्लो - 40
3. वाल्मीकिः, रामायणम्, बालकाण्डः, श्लो- 29-30
4. श्री.भा.वि.सा, मन्दाकिनी, अवतारिका, पृ. सं - 15
5. श्री. भा.वि.सा, कृति, स्वर्णोत्सव संचिका, पृ .सं - 8
6. श्री.भा.वि.सा, कृति, स्वर्णोत्सव संचिका, पृ .सं - 8
7. श्री.भा.वि.सा , स्वर्णोत्सवसंचिका , पृ.सं - 11
8. श्री.भा.वि.सा, स्वर्णोत्सवसंचिका , पृ.सं - 11.